## ऋतो विद्यायोनिसम्बन्धेभ्यः । (२३/९८१)

ऋकारान्तेभ्यो विद्यासम्बन्धवाचिभ्यो[1] योनिसम्बन्धवाचिभ्यश्चोत्तरस्याः षष्ठ्या अलुग् भवति । होतुरन्तेवासी । होतुःपुत्रः । पितुरन्तेवासी । पितुःपुत्रः । ऋतः इति किम् ? आचार्यपुत्रः । मातुलपुत्रः । विद्यायोनिसम्बन्धेभ्यस्तत्पूर्वोत्तरपदग्रहणम्[2] (म. भा. ३. १४७) । विद्यायोनिसम्बन्धवाचिनि एवोत्तरपदे यथा स्यात्, अन्यत्र मा भूत् । [3]होतृधनम् । पितृधनम् । होतृगृहम् । पितृगृहम् ॥

## विभाषा स्वसृपत्योः । (२४/९८२)

स्वसृ पति इत्येतयोः उत्तरपदयोः ऋकारान्तेभ्यः विद्यायोनिसम्बन्धवाचिभ्यः[4] विभाषाऽलुग् भवति । मातुःष्वसा, मातुःस्वसा, मातृष्वसा । पितुःष्वसा, पितुःस्वसा, पितृष्वसा । यदा लुक् तदा 'मातृपितृभ्यां स्वसा' (८. ३. ८४/९८४) इति नित्यं षत्वम् । यदा तु अलुक् तदा 'मातुः पितुर्भ्यामन्यतरस्याम्' (८. ३. ८५/९८३) इति विकल्पेन [5]षत्वम् । दुहितुःपतिः, दुहितृपतिः । ननान्दुःपतिः, ननान्दृपतिः ॥

## आनङ् ऋतो द्वन्द्वे । (२५/९२१)

ऋकारान्तानां विद्यायोनिसम्बन्धवाचिनां यो द्वन्द्वस्तत्रोत्तरपदे पूर्वपदस्य आनङ आदेशो भवति । होतापोतारौ । नेष्टोद्गातारौ । प्रशास्ताप्रतिहर्तारौ । योनि[6]सम्बन्धेभ्यः – मातापितरौ । याताननान्दरौ । नकारोच्चारणं रपरत्वनिवृत्त्यर्थम् । ऋतः इति किम् ? [7]पितृपितामहौ । पुत्रे इत्यत्रानुवर्तते, ऋतः इति च । तेन पुत्रशब्देऽप्युत्तरपदे ऋकारान्तस्यानङादेशो भवति । पितापुत्रौ । मातापुत्रौ ॥

## देवताद्वन्द्वे च । (२६/९२२)

[8]देवतावाचिनां यो द्वन्द्वः [9]तत्रोत्तरपदे पूर्वपदस्य आनङ आदेशो भवति । 'इन्द्रावरुणौ' (ऋ. ६. ६८. १) । 'इन्द्रासोमौ' (ऋ. ६. ७२. ३) । 'इन्द्राबृहस्पती' (ऋ. ४. ४९. १) । द्वन्द्वे इति वर्तमाने पुनर्द्वन्द्वग्रहणं प्रसिद्ध-[10]साहचर्यार्थम् । अत्यन्तसहचरिते लोकविज्ञाते द्वन्द्वम् इत्येतत् निपात्यते । तत्र ये लोके प्रसिद्धसाहचर्या वेदे च ये सहवापनिर्दिष्टास्तेषामिह ग्रहणं भवति । [11]तेन ब्रह्मप्रजापती, शिववैश्रवणौ इत्येवमादौ न भवति ।

[७२७] उभयत्र वायोः प्रतिषेधो वक्तव्यः । (म. भा. ३. १४८)

अग्निवायू । वाय्वग्नी ॥

## ईदग्नेः सोमवरुणयोः । (२७/९२३)

सोम वरुण इत्येतयोः[12] देवताद्वन्द्वे अग्नेः ईकारादेशो भवति । 'अग्नीषोमौ' (ऋ. १.९३.१) । अग्नी-वरुणौ । 'अग्नेः स्तुत्स्तोमसोमाः' (८. ३. ८२/९२४) इति षत्वम् ॥

---

1. च इत्यधिकम् फ. 2. कर्तव्यम् इत्यधिकम् फ. ह. 3. होतृधनम् पितृधनम् नास्ति फ. 4. उत्तरस्याः षष्ठ्याः इत्यधिकम् ब.क.ड.फ.ह. 5. षत्वम् नास्ति क. ह. 6. °सम्बन्धवाचिभ्यः ब. फ. 7. पितृमातामहौ ड. 8. देवतानां क. 9. तत्र चोत्तरपदे फ. 10. °साहचर्यपरिग्रहार्थम् फ. 11. वाक्यमिदं नास्ति ब. 12. उत्तरयोः इत्यधिकम् फ.